# Shri Bala Nyasavidhi

# श्रीबालान्यासविधिः

## Document Information

Text title : Shri Bala Nyasavidhi

File name : bAlAnyAsavidhiH.itx

Category : devii, dashamahAvidyA, devI

Location : doc_devii

Proofread by : PSA Easwaran

Description/comments : bAlAsaparyA saparyAkrama-nAmAvalI-stotrAdisaNgrahaH

Latest update : March 21, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# श्रीबालान्यासविधिः

अस्य श्रीबालान्यासमहामन्त्रस्य दक्षिणामूर्तिः ऋषिः ।
देवी गायत्री छन्दः । श्रीबालापरमेश्वरी देवता ।
ऐं बीजम् । क्लीं शक्तिः । सौः कीलकम् ।
श्रीबालात्रिपुरसुन्दरीप्रीत्यर्थे जपे विनियोगः ।
मूलेन न्यासः ।
ध्यानं -
शब्दब्रह्ममयी चराचरमयी ज्योतिर्मयी वाङ्मयी
नित्यानन्दमयी निरञ्जनमयी सम्पन्मयी चिन्मयी ।
तत्त्वातीतमयी परात्परमयी मायामयी श्रीमयी
सर्वैश्वर्यमयी सदाशिवमयी मां पहि बालाम्बिके ॥

लमित्यादि पञ्चपूजा ।
बालाम्बिकायै नमः (प्राच्यां) ।
कुमारिकायै नमः (दक्षिणस्यां) ।
ललिता पुत्र्यै नमः (पश्चिमायां) ।
शाम्भव्यै नमः (उत्तरस्याम्) ।
भण्डपुत्रदमन्यै नमः (आग्नेय्यां) ।
चिन्मय्यै नमः (नैर्ऋत्यां) ।
ईशनन्दिन्यै नमः (वायव्यां) ।
देव्यै नमः (ऐशान्यां) ।
ब्रह्माण्डरूपिण्यै नमः (ऊर्ध्वायां) ।
सर्वरूपायै नमः (अधः) ।
ऐङ्कार्यै नमः (मूर्ध्नि) ।
क्लीङ्कार्यै नमः (फालमध्ये)
सौः कार्यै नमः (वक्रे) ।
कामेश्यै नमः (कण्ठदेशे) ।

चतुर्भुजायै नमः (हृदयदेशे) ।
अभयप्रदायै नमः (वामे स्तने) ।
शक्त्यै नमः (दक्षिणस्तने) ।
सर्वाङ्गसुन्दर्यै नमः (कुक्षौ) ।
मणिनिभच्छायायै नमः (नाभौ) ।
पाटलप्रभायै नमः (जघने) ।
परमायै नमः (ऊरुद्वन्द्वे)।
शिवयोगिन्यै नमः (जान्वोः)
महामायायै नमः (जङ्घाद्वये) ।
परात्परायै नमः (पादद्वन्द्वे) ।
आत्मानन्द स्वरूपिण्यै नमः (हस्तयोः) ।
पञ्चब्रह्ममय्यै देव्यै नमः (पार्श्वयोः) ।
नारदादिभिरर्चितायै नमः (नेत्रायोः) ।
दुष्टप्रशमन्यै देव्यै नमः (पृष्ठे) ।
भुवनानन्दकारिण्यै अम्बायै नमः (नासाग्रे) ।
नवमाणिक्यशोभाढ्यायै नमः (कपोलयोः) ।
दशोर्ध्ववयसोपेतायै नमः (दन्तेषु) ।
श्रुत्यर्थफलदायिन्यै नमः (कर्णयोः) ।
ऐं शैलपुत्र्यै नमः (पादयोः) ।
क्लीं ब्रह्मचारिण्यै नमः (जान्वोः) ।
सौः ब्रह्मचारिण्यै नमः (कट्याम्) ।
सौः कूश्माण्डायै नमः (नाभौ) ।
क्लीं स्कन्दमात्रे नमः (कुक्षौ) ।
ऐं कात्यायिन्यै नमः । (हृदये) ।
ऐं कालरात्र्यै नमः (कण्ठे) ।
क्लीं महागौर्यै नमः (मुखे) ।
सौः सिद्धिप्रदायै नमः (ललाटे) ।
सौः बालापरमेश्वर्यै नमः (ब्रह्मरन्ध्रे) ।
क्लीं महालक्ष्म्यै नमः (दक्षिणपार्श्वे) ।
ऐं महासरस्वत्यै नमः (वामपार्श्वे) ।

किरिट कुण्डलोपेतां कङ्कणाङ्गदधारिणीम् ।

पीतवस्त्रेण संयुक्तां ब्रह्मानन्दफलप्रदाम् ॥

ब्रह्मादि दैवतैः पूज्यां ब्रह्मानन्दविवर्धिनीम् ।
माणिक्य मकुटोपेतां अङ्गैरलङ्कृतां शुभाम् ॥

सर्वदेवैः परिवृतां सर्वसिद्धैर्निषेविताम् ।
सर्वमन्त्रफलोपेतां साम्राज्यफलदायिनीम् ।
रमावाणी समोपेतां राजराजार्चिताङ्घ्रिकाम् ॥

साक्षाद्ब्रह्ममयीं देवीं चिन्तये सर्वतो मम ॥

बालाध्यानं
ईक्षे बालां परां शक्तिं ललितातनयां शिवाम् ।
कोटिसूर्यप्रतीकाशां चन्द्रकोटिसुशीतलाम् ॥

हृत्पुण्डरीकनिलयां पूगस्तनविराजिताम् ।
बालार्ककिरणोपेतां भालचन्द्रधरां शिवाम् ॥

अक्षमालापुस्तधरां वरदाभयशोभिताम् ।
सर्वाभरणशोभाढ्यां सर्वावयवसुन्दरीम् ॥

अनेककोटि ब्रह्माण्डपालिनीं सुरसेविताम् ।
फुल्लपङ्कजमध्यस्थां पूर्णानन्दवपुर्धराम् ॥

मातृकावर्णपीठस्थां मन्त्रकोटिस्वरूपिणीम् ।
गगनाकारसदृशां खगमध्वजसोदरीम् ॥

कामेश्वरस्य तनयां गानलोलां शुभाननाम् ।
ब्राह्मी माहेश्वरीमुख्यैः सेवितां सिद्धपूजिताम् ।
ध्यायामि तां परां शक्तिं बालां कामेश्वरीसुताम् ॥

इति श्रीबालान्यासविधिः समाप्ता ।

Proofread by PSA Easwaran

*Shri Bala Nyasavidhi*

pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*